National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 188-191
© 2026 NJHSR
www.sanskritarticle.com

**सिद्धार्थवैराग्यः**
शोधच्छात्रः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, अन्धप्रदेशः

**Correspondence:**
**सिद्धार्थवैराग्यः**
शोधच्छात्रः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, अन्धप्रदेशः

# वेणीसंहारे सुवदनाचरित्रचित्रणम्

**सिद्धार्थवैराग्यः**

**विषयसारः-**
प्रबन्धेऽस्मिन् भट्टनारायणप्रणीतवेणीसंहारनाटकस्थदुर्योधनप्रियाभानुमतीसख्याः सुवदनायाश्चरित्रस्य निरूपणं वर्तते। नाटके यद्यपि मुख्यस्त्रीपात्रं द्रोपदी वर्तते। तथापि दुर्योधनपत्नीभानुमतीसख्याः सुवदनायाश्चित्रणं भट्टनारायणेन सुचारुतयाऽक्रियत। तत्र वेणीसंहारे द्वितीयाङ्के विस्तृतरूपेण सुवदनायाः निरूपणं वरीवर्ति। तस्य चरित्रस्य नाटके कथं प्रतिपादितं तत्सर्वमत्र प्रतिपाद्यते। तस्याः सुवदनायाः के गुणाः अस्मिन्नाटके वर्तन्ते तदप्यालोच्यते।
**कुटशब्दाः-** सुवदना, वेणीसंहारः, कुञ्चकी इत्यादयः।

भट्टनारायणप्रणीत**वेणीसंहार**नाटकं संस्कृतनाट्यसाहित्यस्याऽऽकाशे वीररसस्य देदीप्यमाननक्षत्रमिव राराजते। एतन्नाटकं महाभारतस्य भीषणयुद्धकथामाश्रित्याऽरच्यत, यत्र भीमसेनस्य क्रोधः, प्रतिज्ञापूर्तिः, तथा च द्रौपद्याः मुक्तकेशानां पुनर्बन्धनं (वेणीसंहारः) मुख्यलक्ष्यमस्ति. अस्य नाटकस्य महत्त्वन्तु तस्यौजस्विनीभाषाशैल्यां संवादकौशले च निहितमस्ति। कवेर्गौडीरीतिप्राधान्यं पाठकस्य मनसि युद्धस्य सजीवदृश्यमुपस्थापयति। विशेषतोऽश्वत्थामा-कर्णयोर्वाक्कलहः, भीमस्य प्रचण्डगदायुद्धम्, तथा च दुर्योधनस्य दुर्दमनीयो गर्वः नाट्यकलायाः उत्कर्षं प्रदर्शयति। नाटकीयदृष्ट्याऽस्य संरचनं सुदृढमस्ति, यत्र प्रथमाङ्कादेव प्रतिज्ञायाः बीजं वप्तं वर्तते। अतः वीररसस्य गाम्भीर्यं, पात्रोचितं भाषासौष्ठवं तथा च क्षात्रतेजसो निरूपणञ्च विलोक्य ग्रन्थोऽसौ संस्कृतसाहित्यस्यानुपमरत्नत्वेन स्वीक्रियते।

अस्मिन्नाटके षडङ्काः विलसन्ति। तत्रत्यविषयास्त्वित्थं वर्तते- प्रथमाङ्के हरिहरस्तुतिरूपां नान्दीं विधाय निर्गते सूत्रधारे सूत्रधारगुणाकृतिः स्थापकः समागत्य विधीयमाननाटकस्याश्रयभूतं महाभारतन्तथा तस्य कर्तारञ्चाभिनन्द्य नेपथ्योक्तं मुनिवृन्दसहितकृष्णगमनं शृण्वन् संगीतप्रारम्भाय पारिपार्श्विकं समादिश्य प्रबन्धबन्धस्यास्य बीजं सूचयन् पाण्डवा नन्दन्तु धार्तराष्ट्राश्च स्वस्था भवन्तु इति स्वेनोक्तं वाक्यं शृण्वन्तमत एव क्रुद्धं कुरुसन्धानमसहमानं सहदेवसहितं भीमं विलोक्य रङ्गभूमेः सहपारिपार्श्वकेन निष्क्रान्तोऽस्ति। ततश्च समागत्य भीमो मयि जीवति धार्तराष्ट्रा आकृष्टपाण्डववधूकेशा नैव स्वस्था भविष्यन्तीति बोधयन् नटं भर्त्सयन्सहदेवमक्षिपत्पश्चादावादीत्- राजानुरोधेन सन्दधतां भवन्तः, अहन्तु सन्धिविच्छेदमेव करिष्यामीति। एवमेव युधिष्ठिरस्य सन्देशं निवेदयितुमजिज्ञपत्। ततश्च सहदेवेन सह द्रौपद्याश्चतुश्शालामगच्छद्भीमः। पप्रच्छ च केन पणेन सन्धिं करोति राजेति। उपश्रुत्य पञ्चभिर्ग्रामैरित्यतीव क्रुद्धस्सञ्जातः। एतदनन्तरं सह चेट्या बाष्पावृतनेत्रा द्रौपदी समागत्य सन्धिनिमित्तं भीमस्य कोपं विज्ञाय सानन्दं प्रच्छन्ना तत्रैवातिष्ठत्। ततश्च सहदेवस्सर्वान् कौरवान्विनाशयिष्याम्येव न सन्दधामीति ब्रुवन्तं भीममबोधयच्च राज्ञोऽभिप्रायः सन्धिकरणम्, किन्तु ग्रामनामनिर्देशेनापकारस्थान-सूचनमेवेति। ततश्च सहदेवमुखाद्द्रौपद्यागमनं विज्ञाय ताञ्चोद्विग्नामवलोकय तस्य कारणं सन्धिप्रस्ताव आरब्धेऽपि कथं न केशाः संयम्यन्त इति भानुमतीवचनमवागच्छत्। तव, अमुक्तेषु केशेषु मम स्वामिन्याः कथं केशबन्धः कस्मादिति चेट्युक्तमुत्तरं विज्ञाय सानन्दो भीमश्चेट्यै पारितोषिकं प्रादात्।

शीघ्रमेव दुर्योधनोरू भङ्क्त्वा तव केशाः संयम्यन्ते मयेत्यवोचच्च। ततश्च भगवन्तं श्रीकृष्णं बद्धुमारब्धो दुर्योधन इति विज्ञाय मूढः स परब्रह्मरूपं कृष्णं कथमीश्वरत्वेन जानीयादिति दुर्योधनं विनिन्द्य द्रौपदीं समाश्वास्य युद्धाय प्रचलितो भीम इति।[1]

एवमेव द्वितीयाङ्के राज्ञा दुर्योधनेन कञ्चुकी, आदिष्टो यदहं भानुमतीं दृष्ट्वाऽभिमन्योर्हन्तॄन् कर्णजयद्रथादीन् ससम्मानमभि-नन्दयितुं गमिष्यामीति त्वया ज्ञातव्यं सा कुत्र वर्तत इति। कञ्चुकी च व्रतपरिपालनाय तामुद्यानस्थां ज्ञात्वा प्रशस्य च तामचिन्तयत्- कथं महाराजदुर्योधनोऽजेयभीष्मवधेन न दुःख्यति, सुख्यति च बालस्याभिमन्योर्वधेनेति। ततो भानुमतीस्थाननिवेदनाय दुर्योधन-स्य सविधे गतः। अत्रान्तरे सह चेट्या सख्या पृष्टा भानुमती रजनीस्थस्वप्नवृत्तान्तं न्यवेदयद्यत् क्रीडावनेऽद्य ममाग्रे नकुल-नामकजन्तुविशेषेण सर्पशतं व्यापादितम्। अत्रान्तरे सह कञ्चुकिना दुर्योधनोऽपि कविवर्णनविषयोद्यानशोभां पश्यन् भानुमतीनिकटे समागतः। ततश्च कञ्चुकिनं निवर्त्य स्वयं भानुमतीवार्तालापं शुश्रूषुः लतामध्ये प्रच्छन्नो भूत्वा स्थितः, स्वप्नविषयमयथा-वदवगम्य माद्रीसुते नकुलेऽनुरक्ता भानुमतीति विज्ञाय नकुलं हन्तुकामः प्रस्थितः प्रथममियमेव पापिनी हन्तव्येति कृत्वा निवृत्तश्च। ततश्च तासां वचनेन तत्सर्वं स्वप्नविषय इति ज्ञात्वा निवृत्तसंशयो जातः। ततश्चाशुभसूचकस्वप्नशान्त्यर्थं भानुमती सूर्यायार्घ्यं प्रदातुं प्रारब्धा। अत्रान्तरे दुर्योधनो भयभीतभानुमतीपरितोषार्थं सङ्केतेन परिजनं पृथक्कृत्य स्वयमेव तस्या हस्ते पुष्पाणि समर्पयत्। परं पुष्पाणि भूमावपतत्। ततश्च भानुमत्या संघूर्णय दृष्टो दुर्योधनः तस्या भयं न्यवर्तयत्। विहारसुखञ्चान्वभवत्। ततश्च महावायुप्रवाहेण भग्ने रथध्वजे रथकेतनभग्नजन्याशुभशान्त्यर्थं राजपुरोहिताय निवेदयितुं कञ्चुकिनमादिशत्। ततश्चास्तमिते सूर्येऽर्जुनकृतजयद्रथवधमुपशम्य जयद्रथस्य माता, दुःशला स्त्री च दुर्योधनाय निवेदयितुं तत्सविधे समाजगाम। दुर्योधनश्च मम भ्रातॄणां प्रभावात्स्वस्य बलवत्त्वाच्च न कोऽपि जयद्रथस्यानिष्टं कर्तुं शक्नोतीत्येवं बहुविधया वाचा उभे समाश्वास्य निवर्त्य च स्वयमपि युद्धभूमिं गत इति।[2]

इत्थन्तृतीयाङ्के जयद्रथस्य वधदिवसे बहूनां विनाशात्तेषां मांसशोणितैः प्रसन्ना वसागन्धानामराक्षसी स्वपतिं रुधिरप्रियनामानं राक्षसमाह्वत। राक्षसश्च समागत्य कोष्णं रुधिरं देहि, पिपासितोऽस्मीति, पुत्रशोकसंतप्तां घटोत्कचमातरं हिडिम्बादेवीं सान्त्वयितुं गतः, ततश्च तया दुःशासनशोणितपानार्थं युध्यमानस्य भीमसेनस्य पृष्ठे भ्रमितुमाज्ञप्तोऽहमिति वाकथयत्। ततश्च धृष्टद्युम्नकृतद्रोणवधत्रस्तसैन्यमहानादमाकर्णयन्नश्वत्थामाऽविज्ञातद्रोण वधोऽर्जुनादिना परिकोपिततातेन महासङ्ग्रामः कृत इति निश्चित्य स्वयमपि समरभुवं गन्तुं प्रारेभे। अनन्तरं जातं वामनेत्रस्पन्दनमनिष्टसूचकं विज्ञाय सविस्मयं प्रचलितोऽश्वत्थामा समरप्राङ्गणात्पलाय्याग-च्छतः कर्णादीन् दृष्ट्वाऽकथयन्मम पितरि सैन्यपतौ कथं बिभ्यति भवन्त इति। पश्चाच्च सूतमुखा-द्धृष्टद्युम्नकृतं त्यक्तशस्त्रस्य पितुर्मरणं शस्त्रत्यागे कारणमलीकस्वमृत्युञ्च विज्ञाय बहुशो व्यलपत्। ततश्च मातुलकृपाचार्येणाश्वस्तोऽश्वत्थामा शोकं विमुच्य ससैन्यसकृष्णपाण्डवा-न्विनाशितुमैच्छत्। ततश्च कृपः कौरवसेनापतिपदेषु नियोजयितुं तं नीत्वा दुर्योधनकर्णयोः सविधेऽगमत् परं पूर्वनियमानुसारात्कर्णस्येदं पदं प्राप्तमासी-दित्यश्वत्थामाकर्णयोर्वाक्कलहो जातः। अनन्तरश्च कृपदुर्योधनाभ्यां निवर्तिते विग्रहे कर्णस्योपरि सञ्जातकोपोऽश्वत्थामा जीवति कर्णे नाहं शस्त्रं ग्रहीष्यामीति प्रतिजज्ञे। एतदनन्तरमेव दुःशासनक्षत-जपानार्थमागतो भीमः कौरवचमूनामरक्षोऽयं दुःशासन इति न्यगादीत्। एतच्च श्रुत्वाऽश्वत्थाम्ना बहुविधया वाचा दुःशासनं रक्षितुं कर्ण उद्वेजित आक्षिप्तश्च। पश्चाच्च स्वयमपि शस्त्रं ग्रहीतुमैच्छत् परं देववाचा निवृत्तः। अस्तु भीमः स्वप्रतिज्ञामपूरयदिति।[3]

चतुर्थाङ्के च दुःशासनस्य पीताविशेषशोणितेन लिप्ताङ्ग-भीमसेनस्य दर्शनाद्भीताः कौरव-सेना रणभूमेः पलायमानाः दृष्टा ताः समाश्वासयन्नर्जुनेन युध्यमानस्याङ्गराजस्य साहाय्यार्थं समागच्छत्कृपः। दुर्योधनसारथिश्च भीमाद्भीतः मूर्च्छितं कौरवराजं चेतयितुं रथे संस्थाप्य वटच्छायाये समानैषीत्। ततश्च समतीते काले चैतन्यं प्राप्तः कौरवराजोऽविज्ञातदुःशासन-वधस्तस्य रक्षार्थं युद्धभुमिमजिगमिषत्। अनन्तरञ्च सूतमुखादनुजस्य वधं विज्ञाय बहुशो व्यलपत्। अनन्तरञ्च कर्णस्य प्रेष्यः सुन्दरकः महायुद्धचण्डीलीलामवलोकमानः कौरवराजमि-तस्ततो गवेषमाणः कौरवराजसमीपं समागच्छत्। ततश्च निवेदितकर्णकुशलः सुन्दरको दुर्योधनमकथयद्यत् दुःशासनवधेन क्रुद्धोऽङ्गराजो भीमं हन्तुकामो योद्धुं समारब्धः। तदानीं च तयोर्गर्जनेन धनुरास्फालनेन शस्त्रप्रहारेण च तूणीभूतः प्रलयकालः। ततश्च भीमस्य परिभवमाशङ्कमानः किरीटी साहाय्याय समागतः। एतदवलोक्य कर्णपुत्रो वृषसेनोऽपि तत्र समागत्य शरवर्षैः किरीटिनं पर्य्याकुलयदिति। एतच्छ्रुत्वा दुर्योधनो वृषसेनं साधुवादेन प्रशशंस। ततश्च पुनरपि सुन्दरक आह यत् ततोऽर्जुनोऽपि निशितवाणवर्षणाद्द्वाराऽद्भुतं समरं प्रारब्धवान्। वृषसेनेनाप्युभयसैन्यैः प्रशंसनीयं दर्शनीयं च समरं प्रारब्धं परं वृषसेनप्रशंसया क्रुद्धोऽर्जुनो महासङ्ग्रामद्वारा वृषसेनं जघानेति। एतच्छ्रुत्वा विलपन्तं दुर्योधनं सूतः कथमपि समाश्वासयत्। ततश्च सुन्दरकः कर्णेन यदर्थं त्वयाऽहं सम्मानितस्तन्नाकारि मयाऽतः स्वबलेनैव शत्रुजयः कर्तव्य इति लिखितं पत्रं दुर्योधनाय प्रादात्। ततश्च दुर्योधनो यावदेव समरं गन्तुमैच्छत्तावदेव तत्र पित्रोरागमनमश्रौषीदिति।[4]

एवञ्च पञ्चमाङ्के गान्धारीधृतराष्ट्रौ सञ्जयेन सह दुर्योधनस्य सविधे समागच्छताम्। ततोऽति दुःखितो धृतराष्ट्रः विजये त्यक्ताशो दुर्योधनमकथयद्यत्- वत्स! द्रोणभीष्मयोर्जाते वधे कर्णस्य पुरस्तादेव शत्रुणा विनाशिते तत्पुत्रे नास्ति सम्भवः सम्प्रति विजयस्यातोऽभीष्ट-वस्तुप्रदानेन युधिष्ठिरेण सह सन्धिः क्रियतामिति। परन्तु अभिमानी दुर्योधनः सन्धेर्लज्जास्पदत्वं हीने स्वपक्षेऽसम्भवञ्च प्रदर्श्य न स्वीचकार सन्धिं कर्तुम्। पितरौ च निहतषष्टिसहस्रसंख्या-पुत्रस्य तथापि सञ्चालितराज्यभारस्य सगरनामकनृपस्य दृष्टान्तेन समाश्वा-

सयत्। एतदनन्त-रमेव रणभूमौ समुत्पन्नं महानिनादमाकर्ण्य सङ्ग्रामावतरणाय कृतमतिरभूत्। ततश्च नैवं सम्भवति शत्रुपराजय इति छलेन जेतव्यमिति धृतराष्ट्रवचनं विनिन्द्य, असहायोऽप्यहं जेष्याम्येव पाण्डवानित्येवोचन्नित्यभिमानी दुर्योधनः। ततश्चाकस्मात् कर्णमृत्युमुपश्रुत्य सूतमुखान्निश्चित्य च मूर्च्छामगमद्दुर्योधनः। अनन्तरश्च सञ्ज्ञां प्राप्य अये कर्ण! कथं मित्रं मां विहायैकाकी स्वर्गं प्रस्थितवान् इत्येवं बहु विलप्य कर्णस्य हन्तारमर्जुनं हन्तुकामः समराय कृतनिश्चयोऽभूत्। ततश्च दुर्योधनं गवेषमाणौ भीमार्जुनौ तत्रागत्योद्धृतवाचा गान्धारीधृतराष्ट्रौ प्रणेमतुः। तादृशवाचा क्रुद्धस्य दुर्योधनस्य शीघ्रमेव त्वां हनिष्यामीत्यर्धकवाक्यं भीमो श्रुत्वा श्व एव तव जघनं त्रोटयिष्यामीति प्रतिजज्ञे। ततश्च युधिष्ठिराज्ञयोभौ स्वशिविरं प्रस्थितवन्तौ। ततश्च कर्णं परिवदन्नश्वत्थामा स्मृतपितृपराभवः पाण्डवान्विजगिषुर्दुर्योधनसविधे समागतः, कर्णनिन्दाश्रवणात् क्रुद्धदुर्योधनेनावमानितः परावृत्तश्चेति।[5]

*एवमन्तिमे षष्ठाङ्के युधिष्ठिरः अद्यैव दुर्योधनस्य जघनं* त्रोटयिष्यामीति भीमस्य प्रतिज्ञां श्रुत्वा क्वापि प्रलीनस्य दुर्योधनस्यान्वेषणार्थं सर्वत्र बहुंश्चरान्प्राहिणोत्। अनन्तरं च पाञ्चालको दूतो युधिष्ठिरस्य सविधे समागत्य न्यवेदयद्यत् कृष्णार्जुनाभ्यां सह भीमो बहुत्र प्रदेशेऽन्वेषणेनाप्यविज्ञात-दुर्योधनस्थानः केनापि व्याधेन विज्ञापितो यदस्य सरसस्तीरे पदचिह्नं वर्तत इति तत्र दुर्योधनो वर्तते न वेति भवन्त एव निश्चेतुं शक्नुवन्तीति। ततश्च तत्र गत्वा सुवंशोत्पन्नोऽभिमानी त्वं मद्भयात्कथमत्र पङ्के लीयसे। दुःशासनवधप्रतीकारसमय एव कथं तवाभिमानो विनष्ट इत्येवं भाषमाणे भीमस्तत्सरःसमन्तादुन्मथितवान्। ततश्च तादृशवाचोद्विग्नो दुर्योधनः सरसस्तस्मान्निःसृतः विनष्टस्वसैन्यं मांसप्रियगृध्रादिव्याप्तमस्मद्वीर-सिंहनादाव्याप्तरण-स्थानमालोक्य निःश्वसितवान्। एवंविधं दुर्योधनं विलोक्य पाण्डवानां मध्ये येनैकेन सह युयुत्सुस्त्वं तेनैव सह युध्यस्वेति भीमेनोक्तो दुर्योधनस्तमेव युद्धप्रियं मत्वा योद्धुमारब्धः। अहं च राज्याभिषेकसामग्रीसञ्चयनाय भगवता श्रीकृष्णेन भवत्सविधे प्रेषित इति। ततो युधिष्ठिरेण पारितोषिकेण पाञ्चालकं परितोषयितुमाज्ञप्तः कञ्चुकी निर्गतः। अनन्तरश्च चार्वाको नाम राक्षसः मुनिवेषेण युधिष्ठिरं वञ्चयितुं समागत्य तृषितोऽस्मीति युधिष्ठिरमश्रावयत्। निशम्य च युधिष्ठिरः जलं दातुं कञ्चुकिनमजिज्ञपत् परं राक्षसः, सम्भाव्यते भवान्क्षत्रिय इति साम्प्रतिकसङ्ग्रामे बन्धुनाशसम्भवे-नाशोचिनस्तव जलं नादेयं छाययैव विगतक्लमो भविष्यत्यूचे। अनन्तरं क्लमकारणं पृष्टो राक्षसः, दुर्योधनेन बलभद्रसङ्केतेन हते भीमेऽर्जुनदुर्योधनयोः प्रवृत्तमसम्पूर्णं गदायुद्धं विलोक्य समागत इत्युत्तरयामास। एवं वाचं निशम्य द्रौपदीयुधिष्ठिरौ मूर्च्छामुपगतौ बहु विलप्य कञ्चुकिना चेट्या च कृतपरिचयौ लब्धसञ्ज्ञौ मरणाय कृतनिश्चयौ अभूताम्। ततश्च द्रौपद्योक्तमहं चितां विरचय्य भस्मीभवामि त्वं समराय गच्छ अथवा यत्ते रोचत इति। युधिष्ठिरस्तु समराय कृतसाहसोऽपि पुनरपि राक्षसेन प्रतारितश्चितायामेव भस्मीभवितुं निश्चिचाय। उभौ स्वबान्धवाय किञ्चित्सन्दिश्य यावदेव चितां प्रविविक्षू तावदेव पूरितप्रतिज्ञो रुधिरस्नपितदेहो भीमस्तत्रैव समागतः। परं तं दुर्योधनबुद्ध्या हननाय, गाढं सजग्राह युधिष्ठिरः। पाश्चात्तं भीमं विज्ञाय सप्रसादोऽमुञ्चत्। ततो भीमः द्रौपद्या केशव्रातमवध्नीत। अर्जुनेन सह कृष्णोऽप्यागत्याभिनन्द्य चोवोचत्, यदेते वाल्मिक्यादिमुनयः तवाभिषकाय समागताः। युधिष्ठिरोऽपि प्रसन्नं कृष्णं सर्वदा विश्वकल्याणाय प्रार्थयामासेति।[6]

वेणीसंहारनाटके दुर्योधनप्रियाभानुमत्याः सखी सुवदना गौणपात्रेष्वविस्मरणीया सृष्टिः यद्यपि महाभारते सुवदनायाः स्थानं नैव वर्तते। तथापि स्वनाटकानुसारं प्रसङ्गं परिवर्त्यास्थापयद्भट्ट-नारायणः। तस्याश्चारित्रिकवैशिष्ट्यानि नाटकानुसारमधो विचार्यते। सुवदनायाः स्वभावे स्वसखीं प्रति अलङ्घनीयनिश्छलप्रेम तथा तस्याः सङ्कटसहने दार्ढ्यमिति वैशिष्ट्यद्वयं भट्टनारायणेन सम्यक्तया प्रतिपाद्यते।

यदा भानुमती स्वप्नं विलोक्य दुखिताऽजायत तदैव सुवदना भानुमत्याः पार्श्वे स्वप्नवृत्तान्तं ज्ञातुं प्रभवति। भानुमती च यदा स्वप्नवृत्तान्तं वक्ति तथा सुवदनां प्रति पृच्छति तदा सुवदना विचिन्तितवती स्वप्नेऽस्मिन् कश्चन शुभसङ्केतो नास्ति तथाप्यस्मिन् समये स एव स्निह्यजनः, यो हि प्रश्नस्योत्तरेण कठोरमपि हितकरवाक्यं वक्ति। तथापि साऽवदत्- अयमशुभसङ्केतप्रदायकः स्वप्न इति। तथा च वृत्तान्तः-

हला! कथय किमत्र प्रशस्तं किं वाऽशुभसूचकमितीत्थमेक्तायां सुवदनायां सुवदना चिन्तयति- **अत्र नास्ति स्तोकमपि शुभसूचकम्। ततोऽलीकं कथयन्ती प्रियसख्या अपराधिनी भविष्यामि। स इदानीं स्निग्धो जनो यः पृष्टः परुषमपि हितं भणति।**[7] प्रकाश्ये च वक्ति- **सखि, सर्वमेवैतदशुभनिवेदनम्। तद्देशतानां प्रणामेन द्विजातिन-प्रतिग्रहेण चान्तर्यताम्। न खलु दंष्ट्रिणो नकुलस्य वा दर्शनमहिशतवधं च स्पप्ने प्रशंसन्ति विचक्षणाः।**[8] अत्र सुवचनायाः विचक्षणतायाः परिचयो लभ्यते। तथा सखीं प्रत्यानुगत्यस्य परिचयो लभ्यते।

सुवदना सामाजिक-धार्मिक-राजनैतिकज्ञानस्पन्ना काचित्सूक्ष्म-दर्शिनी आसीदिति भट्टनारायणेन चित्रितम्। तथा च सा भानुमतिं प्रति वक्ति स्वप्ने सुकरस्य नकुलस्य च दर्शनम्, सर्पाणां वधः इत्यादिकं शुभसङ्केतत्वेन नैव गृह्यते विद्वद्भिः। एतेन सुवदनायाः सूक्ष्मदर्शितायाः परिचयो लभ्यते। अस्य समर्थनमपि दुर्योधनेन कृतं यत्- **अवितथमाह सुवदना। नकुलेन पन्नगशतवधः स्तनांशुकापहरणं च नियतमनिष्टोदर्कं तर्कयामि।**

**पर्यायेण हि दृश्यन्ते स्वप्नाः कामं शुभाशुभाः।**
**शतसंख्या पुनरियं सानुजं स्पृशतीव माम्॥**[9]

नैपथ्ये शब्दादीन् निशम्य भानुमती भीत्या राजानं दुर्योधन-मालिङ्ग्यावदत्- आर्यपुत्र! रक्षतु रक्षतु इति। तदा सुवदना एवोभाभ्यामवदद्यत्- **महाराज! दारूपर्वतस्य महलेऽस्मिन् प्रविशतु। वायौ उद्वेगजनकः, उड्डीयमानधूलकणैः नेत्रयोः व्याकुलताकारकः, मूलाद्विच्छिन्नवृक्षाणां शब्देन भयभीतः, अश्वालयात् निर्गतैः श्रेष्ठवाजिभिः जनमार्गस्य हानिकारकः च भयावहः झञ्झावातः।**[10] सुवदनायाः इत्थं भयङ्करझञ्झावातावगनं तस्याः उत्कृष्टबौद्धिक-स्तरस्य परिचयो दीयते।

**❖ उपसंहारः-**

भट्टनारायणस्य लेखन्यां सुवदना एकाऽविस्मरणीया सृष्टिः। तथा च वीररसस्य अपूर्वा मूर्तिः इव विराजते। तस्याश्चरित्रे च कारुण्येन साकं धैर्यशालित्वस्य नीतिपरायणत्वस्य सखीस्नेहत्वस्य विचारपरायणस्य विचक्षणत्वस्य परिचयस्सम्प्राप्यते इति शम्।

**❖ सन्दर्भग्रन्थसूची-**


१. **रत्नावली।** श्रीहर्षः। चौखम्बासुरभारतीप्रकाशनम् :वाराणसी, २००३

२. **रघुवंशम्।** कालिदासः। सं. एम.आर. काले। मोतीलाल-बनारसीदासः : दिल्ली, १९७२

३. **मालतीमाधवम्।** भवभूतिः। चौखम्बाविद्याभवनम् : वराणसी।

४. **मालतीमाधवम्।** भवभूतिः। चौखम्बासंस्कृतसीरीज : वाराणसी, १९७१

५. **संस्कृत काव्यशास्त्र का इतिहास।** डा. उमाशंकर(ऋषि)। चौखम्बा संस्कृत प्रतिष्ठान : वाराणसी, १९९९

६. **अलङ्कारशास्त्र की परम्परा।** डा. राजवंशसहायः 'हीरा'। चौखम्बाप्रकाशनम् : वाराणसी

७. **अलङ्काररत्नाकरः।** शोभाकरमित्रः। ओरिएण्टल-बुक्-एजेंसी : पुना, १९८२।

८. **अलङ्कारशेखरः।** केशवमिश्रः। प्रका. जयकृष्णदासः एवं हरिदास-गुप्तः। चौखम्बा संस्कृत सीरीज आफिस : बनारस

९. **अलङ्कारसर्वस्वम्।** रुय्यकः। निर्णयसागरः : मुम्बई, सं- १८९३

१०. **अष्टाध्यायी।** पाणिनिः। व्याख्या. डा. नरेशझा। चौखम्बासुर-भारतीप्रकाशनम् : वाराणसी, २०१७

११. **काव्यमीमांसा।** राजशेखरः। व्याख्या. यमुनारामत्रिपाठी। शारदासंस्कृतसंस्थानम्।

१२. **काव्यात्ममीमांसा।** डा. श्रीजयमन्तमिश्रः। चौखम्बासुर-भारतीप्रकाशनम् : वाराणसी, प्रथमसंस्करणम्।

१३. **वेणीसंहारः।** भट्टनारायणः। व्याख्या.- आदित्यनारायणपाण्डेयः। चौखम्बा संस्कृत सीरिज आफिस : वाराणसी, प्रथमसंस्करणम्।


**पाद टिप्पणी**

[1]वेणीसंहारः, प्रथमाङ्कः, सारांशः- प्रस्तावनाभागः

[2]वेणीसंहारः, द्वितीयाङ्कः, सारांशः- प्रस्तावनाभागः

[3]वेणीसंहारः, तृतीयाङ्कः, सारांशः- प्रस्तावनाभागः

[4]वेणीसंहारः, चतुर्थाङ्कः, सारांशः- प्रस्तावनाभागः

[5]वेणीसंहारः, पञ्चमाङ्कः, सारांशः- प्रस्तावनाभागः

[6]वेणीसंहारः, षष्ठाङ्कः, सारांशः- प्रस्तावनाभागः

[7]वेणीसंहारः, द्वितीयाङ्कः

[8]वेणीसंहारः, द्वितीयाङ्कः

[9]वेणीसंहारः, द्वितीयाङ्कः

[10]वेणीसंहारः, द्वितीयाङ्कः